॥ ज्ञानादेव तु कैवल्यम् ॥

# विवेकदीपिनी

## (प्रश्नोत्तररत्नमालिकासंग्रहः)


# वेदान्त भारती

(संशोधन संस्था)

चन्द्रमौळी मार्गः कृष्णराजनगरम्

मैसूरु मण्डलम् – ५७१ ६०२

**Viveka Deepinee-** A Collection of shlokas from Prashnottarararatnamalika

FIRST PRINT : 2006

© : *Vedanta Bharati*

PAGES : 20

PRICE : Rs. 5.00

PUBLISHED BY :
**Vedanta Bharati** Research Academy
Chandramouli Road, Krishnarajanagara - 571 602,
Mysore District. Ph: 08223-262471

PRINTED AT :

**Span Print**
BanaShankari, Bangalore- 70
Phone : 26718831

# Before Kindling

It is well known that today's youth have been denied introduction to Indian culture and heritage, as a result of which they are trapped in a life of indiscipline and disunity. This is indeed a cause for concern among the elders of our nation. It is also a unanimous opinion of the educationists that it is their primary duty to impart the knowledge of Indian culture and moral values to the youth.

Vedanta Bharati is an organization which has stepped in to render its humble services in this endeavor. "**Viveka Deepini**" is an activity organized by Vedanta Bharati where in students of high school level are taught the selection of shlokas from **Prashnottaramalika**. This composition is most suitable in giving appropriate guidance to these children. Being simple and lucid Prashnottaramalika is specially suited for personality development in children.

We request the cooperation of parents and teachers in delivering the benefits of this book to the student community. Suggestions in this regard are welcome.

Director,
Vedanta Bharati

# विवेकदीपिनी

(प्रश्नोत्तररत्नमालिकासंग्रहः)

**कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान् ।**
**अमुया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ॥१॥**

दृष्टादृष्टार्थसाधनपटीयान् = He who is adept in achieving fruits, visible and invisible, कः = Who, कण्ठस्थितया = Adorning the neck, अमुया प्रश्नोत्तर–रत्नमालिकया = With this precious garland of questions and answers, न अलंक्रियते खलु = Will not decorate?

This precious garland of questions and answers will decorate the neck of any person who is wise enough to achieve visible and invisible benifits (by learning and imbibing it)

**भगवन् किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।**
**को गुरुरधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥२॥**

प्रश्नः : भगवन् किमुपादेयम् = Most revered sir, What is to be accepted? (obeyed).

उत्तरम्: गुरुवचनम् = The words of all the elders and teachers.

प्र : हेयमपि किम् = What should not be followed?

उ : अकार्यम् = Any act that is prohibited.

प्र : को गुरुः = Who is a teacher?

(What kind of a person is a true teacher?)

उ : अधिगततत्त्वः, शिष्यहितायोद्यतः सततम् = A true teacher is the one who has obtained true knowledge of the soul and always engages himself in the interest (welfare) of the disciple.

**कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ।**
**कः पण्डितो विवेकी किं विषमवधीरणा गुरुषु ॥३॥**

प्र : कः पथ्यतरः = What is more suitable?

(What is more beneficial?)

उ : धर्मः = The Prescribed course of conduct or righteousness (virtue).

प्र : कः शुचिरिह = Who is considered to be pure?

उ : यस्य मानसं शुद्धम् = One whose mind is pure.

प्र : कः पण्डितः = Who is considered to be proficient?

उ : विवेकी = One who can discriminate (between good and bad, the truth and untruth, permanent and ephemeral etc.)

प्र : किं विषम् = What is poison?

उ : अवधीरणा गुरुषु = Disrespect towards teachers & Elders.

**किं मनुजेषु इष्टतमम् स्वपरहिताय उद्यतं जन्म ।**
**के च दस्यवो विषयाः को वैरी यस्त्वनुद्योगः ॥४॥**

प्र : किं मनुजेषु इष्टतमम् = What is that which is most desired among human beings?

उ : स्वपरहिताय उद्यतं जन्म = Dedicating life for the good of others and himself, one who is benevolent.

प्र : के च दस्यवः = Who are the bandits?

उ : विषयाः = Objects perceived by the senses.

प्र : को वैरी = Who is an enemy? (to himself and society)

उ : यस्त्वनुद्योगः = One who is indolant.

**कस्माद् भयमिह मरणात्   अन्धादिह को विशिष्यते रागी।**
**किं दुःखमसन्तोषः   किं लाघवमधमतो याञ्चा ॥५॥**

प्र : इह कस्माद् भयम् = What causes fear?

उ : मरणात् = Death.

प्र : इह अन्धात् को विशिष्यते = Who is worse than the blind?

उ : रागी = One who is covetous.

प्र : किं दुःखम् = What is grief?

उ : असन्तोषः = Not having contentment (Discontent-ment).

प्र : किं लाघवम् = What is dishonour?

उ : अधमतो याञ्चा = Begging from a mean person.

**पातुं कर्णाञ्जलिभिः किम्   अमृतमिह युज्यते सदुपदेशः ।**
**किं गुरुताया मूलं   यदेतदप्रार्थनं नाम ॥६॥**

प्र : पातुं कर्णाञ्जलिभिः किममृतमिह युज्यते = What is considered nector to the ears?

उ : सदुपदेशः = Virtuous advice.

प्र : किं गुरुताया मूलम् = What is the root cause of dignity or respectability?

उ : यदेतदप्रार्थनं नाम = Not imploring or begging (with head bowed and hands join) causes dignity.

**किं जीवितमनवद्यं किं जाड्यं पाठतोऽप्यनभ्यासः ।**
**को जागर्ति विवेकी का निद्रा मूढता जन्तोः ॥७॥**

प्र : किं जीवतम् = What is a noble (ideal) life?

उ : अनवद्यम् = Being blameless (faultlessness).

प्र : किं जाड्यम् = What is inertness?

उ : पाठतोऽप्यनभ्यासः = Not practising even after the lesson is taught.

प्र : को जागर्ति = Who is awake? (Who is alert?)

उ : विवेकी = One who can discriminate.

प्र : का निद्रा = What is sleep?

उ : मूढता जन्तोः = The ignorance of living beings.

**नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः ।**
**कोऽनर्थफलो मानः का सुखदा साधुजनमैत्री ॥८॥**

प्र : नलिनीदलगतजलवत्तरलं किम् = What is unsteady like water on the lotus leaf?

उ : यौवनं धनं च आयुः = Youth, wealth and longevity.

प्र : कः अनर्थफलः = What causes disaster.

उ : मानः = Haughtiness (pride).

प्र : का सुखदा = What brings happiness?

उ : साधुजनमैत्री = The friendship with noble people.

**को नरकः परवशता　　किं सौख्यं सर्वसङ्गविरतिर्या ।**
**किं सत्यम् भूतहितं　　प्रियं च किं प्राणिनामसवः ॥९॥**

प्र : को नरकः = What is hell?

उ : परवशता = Dependency.

प्र : किं सौख्यम् = What is pleasure?

उ : या सर्वसङ्गविरतिः = Detachment of all worldly associations.

प्र : किं सत्यम् = What is truth ?

उ : भूतहितम् = Welfare of living beings.

प्र : प्राणिनां प्रियं च किं = What is dear to animals?

उ : (प्राणिनां) असवः = Their lives.

**किं मरणं मूर्खत्वं　　किं चानर्घं यदवसरे दत्तम् ।**
**आमरणात् किं शल्यं　　प्रच्छन्नं यत्कृतं पापम् ॥१०॥**

प्र : किं मरणम् = What is death?

उ : मूर्खत्वम् = Stupidity.

प्र : किं च अनर्घम् = What is most precious?

उ : यद् अवसरे दत्तम् = Timely help (provided at proper time).

प्र : आमरणात् किं शल्यम् = What is painful till death?

उ : यत् प्रच्छन्नं कृतं पापम् = The sins committed secretly.

**कुत्र विधेयो यत्नः　　विद्याभ्यासे सदौषधे दाने ।**
**का प्रेयसी विधेया　　करुणा दीनेषु सज्जने मैत्री ॥११॥**

प्र : कुत्र विधेयो यत्नः = Where is effort to be applied?

उ : विद्याभ्यासे सदौषधे दाने च = In learning, in proper medication and charities.

प्र : का प्रेयसी विधेया = What should be close to one's heart? (What should be favourite?)

उ : करुणा दीनेषु सज्जने मैत्री = To show kindness to the poor and needy, and friendship with the noble.

**कः साधुः सद्वृत्तः कमधममाचक्षते त्वसद्वृत्तम् ।**
**केन जितं जगदेतत् सत्यतितिक्षावता पुंसा ॥१२॥**

प्र : कः साधुः = Who is perfect?

उ : सद्वृत्तः = One with good conduct and character.

प्र : कम् अधमम् आचक्षते = Who is considered very low, mean and bad?

उ : असद्वृत्तम् = One whose character is bad.

प्र : केन जितं जगदेतत् = Who can conquer this world?

उ : सत्यतितिक्षावता पुंसा = He, who is true and tolerant.

**कस्मै नमांसि देवाः कुर्वन्ति दयाप्रधानाय ।**
**इह भुवने कः शोच्यः सत्यपि विभवे न यो दाता ॥१३॥**

प्र : देवाः कस्मै नमांसि कुर्वन्ति = Who is honoured even by gods?

उ : दयाप्रधानाय = He who considers that kindness is supreme. (One who is compassionate).

प्र : इह भुवने कः शोच्यः = Who is to be shown pity in this world?

उ : सत्यपि विभवे न यो दाता = The one, who is not charitable and generous, even if wealthy and very rich.

**कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीतस्य ।**
**क्व स्थातव्यं न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥१४॥**

प्र : कस्य वशे प्राणिगणः = Who has living beings under his control?

उ : सत्यप्रियभाषिणो विनीतस्य = A humble person whose words are true and pleasent.

प्र : क्व स्थातव्यम् = Where should one be?

उ : न्याय्येपथि दृष्टादृष्टलाभाढ्ये = One should stay in the right path by which benefit is obtained by visible and invisible means.

**कोऽन्धो योऽकार्यरतः को बधिरो यो हितानि न शृणोति ।**
**को मूको यः काले प्रियाणि वक्तुं न जानाति ॥१५॥**

प्र : कः अन्धः = Who is blind?

उ : यः अकार्यरतः = He who is engaged in prohibited actions.

प्र : कः बधिरः = Who is deaf?

उ : यः हितानि न शृणोति = He, who turns a deaf ear to good advice.

प्र : कः मूकः = Who is dumb?

उ : यः काले प्रियाणि वक्तुं न जानाति = The one who does not speak affectionate and comforting words at the appropriate time.

**किं दानमनाकांक्षं किं मित्रं यो निवारयति पापात् ।**
**कोऽलङ्कारः शीलं किं वाचां मण्डनं सत्यम् ॥१६॥**

प्र : किं दानम् = What is charity?

उ : अनाकांक्षम् = Giving without expecting any benefit in return?

प्र : किं मित्रम् = Who is a true friend?

उ : यो निवारयति पापात् = One who prevents a person from committing sins.

प्र : कः अलङ्कारः = What is a real ornament?

उ : शीलम् = Character.

प्र : किं वाचां मण्डनम् = What is the embellishment for ones speech?

उ : सत्यम् = Truth.

**विद्युद्विलसितचपलं किं दुर्जनसङ्गतिश्च सम्पच्च ।**
**कुलशीलनिष्प्रकम्पाः के कलिकालेऽपि सज्जना एव ॥१७॥**

प्र : विद्युद्विलसितचपलं किम् = What is unstable like lightning?

उ : दुर्जनसङ्गतिश्च सम्पच्च = Company of the wicked and wealth.

प्र : कुलशीलनिष्प्रकम्पाः के = Who are unevering in their family tradition and perfection in character ?

उ : कलिकालेऽपि सज्जना एव = The virtuous are stable even in this Kali era.

**दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।**
**वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥१८॥**

(प्र : लोके दुर्लभं किम् = What is difficult to achieve in this world?)

उ : दानं प्रियवाक्सहितम् = Charity with affectionate words, ज्ञानमगर्वम् = Knowledge without pride, क्षमान्वितं शौर्यम् = Might with forgiveness, वित्तं त्यागसमेतम् = Wealth with renunciation, दुर्लभमेतच्चतुर्भद्रम् = These four virtues are difficult to achieve.

**विद्वन्मनोहरा का    सत्कविता बोधवनिता च ।**
**कं न स्पृशति विपत्तिः    प्रवृद्धवचनानुवर्तिनं दान्तम् ॥१९॥**

प्र : विद्वन्मनोहरा का = What attracts the minds of learned?

उ : सत्कविता, बोधवनिता च = Good poetry (literature), the intelligence and knowledge.

प्र : कं न स्पृशति विपत्तिः = Whom do the calamities not affect?

उ : प्रवृद्धवचनानुवर्तिनं दान्तम् = Him, Who has controlled his senses and acts as guided by the advice of the well learned.

**कस्मै स्पृहयति कमला तु    अनलसचित्ताय नीतिवृत्ताय ।**
**त्यजति च कं सहसा    पितृगुरुसुरनिन्दाकरं च सालस्यम् ॥२०॥**

प्र : कस्मै स्पृहयति कमला = Whom does Goddess Lakshmi desire to favour?

उ : अनलसचित्ताय नीतिवृत्ताय = Him who is not indolent and who is of noble disposition.

प्र : त्यजति च कं सहसा = Whom does Goddess Lakshmi abandon at once?

उ : पितृगुरुसुरनिन्दाकरं च सालस्यम् = Godess Lakshmi Discards him who insults parents, preceptors and Gods, and who is lazy.

**कुत्र विधेयो वासः सज्जननिकटेऽथवा काश्याम् ।**
**कः परिहार्यो देशः पिशुनयुतो लुब्धभूपश्च ॥२१॥**

प्र : कुत्र विधेयो वासः = Where should one live?

उ : सज्जननिकटे अथवा काश्याम् = In the company of noble people or in Kashi.

प्र : कः परिहार्यो देशः = Which place should be avoided?

उ : पिशुनयुतो लुब्धभूपश्च = The country with slanderers and a greedy ruler.

**को हि न वाच्यः सुधिया परदोषश्चानृतं तद्वत् ।**
**किं सम्पाद्यं मनुजैः विद्या वित्तं बलं यशः पुण्यम् ॥२२॥**

प्र : को हि न वाच्यः सुधिया = What should not be spoken by a wise person?

उ : परदोषश्चानृतं तद्वत् = The wise should not speak about others mistakes and likewise, lies.

प्र : किं सम्पाद्यं मनुजैः = What should men earn?

उ : विद्या वित्तं बलं यशः पुण्यम् = Man should earn knowledge, wealth, strength fame and virtue.

**का च सभा परिहार्या हीना या वृद्धसचिवेन ।**
**इह कुत्रावहितः स्यात् मनुजः किल राजसेवायाम् ॥२३॥**

प्र : का च सभा परिहार्या = Which assembly should be shunned (abandoned)?

उ : हीना या वृद्धसचिवेन = The assembly where there are no experienced and learned guides.

प्र : इह कुत्रावहितः स्यान्मनुजः किल = Where should a person be indeed alert?

उ : राजसेवायाम् = Where, one is in the service of the king.

**प्राणादपि को रम्यः कुलधर्मः साधुसङ्गश्च ।**
**का संरक्ष्या कीर्तिः पतिव्रता नैजबुद्धिश्च ॥२४॥**

प्र : प्राणादपि को रम्यः = What is more pleasing than one's life?

उ : कुलधर्मः साधुसङ्गश्च = The family tradition and the company of the holy & nobles.

प्र : का संरक्ष्या = What is to be protected ?

उ : कीर्तिः, पतिव्रता, नैजबुद्धिश्च = Honour, chastity and one's own mind.

**का कल्पलता लोके सच्छिष्यायार्पिता विद्या ।**
**कोऽक्षयवटवृक्षः स्यात् विधिवत्सत्पात्रदत्तदानं यत् ॥२५॥**

प्र : का कल्पलता लोके = In this world what is considered as Kalpalata, the wish fulfilling creeper?

उ : सच्छिष्यायार्पिता विद्या = The knowledge imparted to a worthy disciple.

प्र : कोऽक्षयवटवृक्षः स्यात् = Which is that banyan tree that never perishes?

उ : विधिवत् सत्पात्रदत्तदानं यत् = The charity given to a deserving person as prescribed in scriptures.

**किं शस्त्रं सर्वेषां युक्तिर्माता च का धेनुः ।**
**किं नु बलं यद्धैर्यं को मृत्युर्यदवधानरहितत्वम् ॥२६॥**

प्र : किं शस्त्रं सर्वेषाम् = What is a weapon for all?
उ : युक्तिः = Apropriate reasoning.
प्र : माता च का = Who is the mother?
(other than she who has given birth)?
उ : धेनुः = The cow.
प्र : किं नु बलम् = What exactly is strength?
उ : यत् धैर्यम् =Courage is strength (stability of the will).
प्र : कः मृत्युः = What is considered to be death?
उ : यत् अवधानरहितत्वम् = lack of alertness.

**कुत्र विषं दुष्टजने किमिहाशौचं भवेदृणं नराणाम् ।**
**पातकं च किं हिंसा भयमपि किं वित्तमेव सर्वेषाम् ॥२७॥**

प्र : कुत्र विषम् = Where does the poison exist?
उ : दुष्टजने = In the wicked.
प्र : किमिहाशौचं भवेत् नराणाम् = What is considered pollution for people?
उ : ऋणम् = The bad debt.
प्र : पातकं च किं = What is criminal act?
उ : हिंसा = Violence.
प्र : भयमपि किं = What is fear?
उ : वित्तमेव सर्वेषाम् = Wealth is fear for all.

**सम्भावितस्य मरणादधिकं किं दुर्यशो भवति ।**
**लोके सुखी भवेत्को धनवान् धनमपि च किं यतश्चेष्टम् ॥२८॥**

प्र : सम्भावितस्य मरणादधिकं किं = What is greater than death for a respected person.

उ : दुर्यशो भवति = The ill fame.

प्र : लोके सुखी भवेत् कः = Who will be happy in this world?

उ : धनवान् = The wealthy.

प्र : धनमपि च किम् = What is true wealth?

उ : यतश्चेष्टम् = That which fulfils our desires.

**को वर्धते विनीतः को वा हीयते यो दृप्तः ।**
**को न प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ॥२९॥**

प्र : कः वर्धते = Who prospers?

उ : विनीतः = One who is humble.

प्र : को वा हीयते = Who indeed does perish?

उ : दृप्तः = One who is conceited.

प्र : कः न प्रत्येतव्यः = Who should not be trusted?

उ : ब्रूते यश्चानृतं शश्वत् = One who always utters lies, should not be trusted.

**कुत्रानृतेऽप्यपापं यच्चोक्तं धर्मरक्षार्थम् ।**
**को धर्मोऽभिमतो यः शिष्टानां निजकुलीनानाम् ॥३०॥**

प्र : कुत्र अनृतेऽप्यपापम् = Where is even telling lies is not sinful?

उ : यच्च उक्तं धर्मरक्षार्थम् = When it is told in order to protect righteousness.

प्र : कः धर्मः = What is righteousness?

उ : अभिमतो यः शिष्टानां निजकुलीनानाम् = That which is accepted by the well learned and who come from traditional families.

**साधुबलं किं दैवं कः साधुः सर्वदा तुष्टः ।**
**दैवं किं यत्सुकृतं कः सुकृती श्लाघ्यते च यः सद्भिः॥३१॥**

प्र : साधुबलं किं = What is the strength of the noble?

उ : दैवम् = Fortune or Divine Power.

प्र : कः साधुः = Who is noble?

उ : सर्वदा तुष्टः = The one who is always contented.

प्र : दैवं किम् = What is meant by divine power?

उ : यत् सुकृतम् = The virtuous deeds done.

प्र : कः सुकृती = Who is virtuous?

उ : श्लाघ्यते च यः सद्भिः (पूज्यते यः विद्वद्भिः) = The one who is praised and honoured by the good and noble.

**को धन्यः संन्यासी को मान्यः पण्डितः साधुः ।**
**कः सेव्यो यो दाता को दाता योऽर्थितृप्तिमातनुते ॥३२॥**

प्र : को धन्यः = Who is fortunate?

उ : संन्यासी = The one who has renounced.

प्र : को मान्यः = Who is an honourable one?

उ : पण्डितः साधुः = He, who is learned and noble.

प्र : कः सेव्यः = Who should be served?

उ : यो दाता = The charitable and generous person.

प्र : को दाता = Who is charitable and generous?

उ : योऽर्थितृप्तिमातनुते = He who satisfies the needy.

**किं दुष्करं नराणां यन्मनसो निग्रहः सततम् ।**
**कः शूरो यो भीतत्राता त्राता च कः स गुरुः ॥३३॥**

प्र : किं दुष्करं नराणाम् = What is difficult to be achieved by the people?

उ : यन्मनसो निग्रहः सततम् = Controlling the mind all the times.

प्र : कः शूरः = Who is brave?

उ : यो भीतत्राता = One who protectes the frightened.

प्र : त्राता च कः = Who is the saviour?

उ : सः गुरुः = The preceptor.

**कस्य न शोको यः स्याद् अक्रोधः किं सुखं तुष्टिः ।**
**को राजा रञ्जनकृत् कश्च श्वा नीचसेवको यः स्यात् ॥३४॥**

प्र : कस्य न शोकः= Who will be without sorrows?

उ : यः स्यादक्रोधः = He, who is free from anger.

प्र : किं सुखम् = What is happiness?

उ : तुष्टिः = Contentment.

प्र : को राजा = Who is the King?

उ : रञ्जनकृत् = He who provides happiness to his subjects.

प्र : कश्च श्वा = Who leads a dogs' life?

उ : नीचसेवको यः स्यात् = The one who serves the vile.

**प्रत्यक्षदेवता का माता पूज्यो गुरुश्च कस्तातः ।**
**कोऽपरिहार्यो मृत्युः कुत्र पदं न्यसेच्च दृक्पूते ॥३५॥**

प्र : प्रत्यक्षदेवता का = Who is the visible goddess?

उ : माता = The mother.

प्र : पूज्यो गुरुः कः = Who is the honourable teacher?
उ : तातः = The father.
प्र : कः अपरिहार्यः = What is unavoidable?
उ : मृत्युः = The death.
प्र : कुत्र पदं न्यसेत् = Where should one step?
उ : दृक्पूते = In a place which is observed carefully.

**कश्च कुलक्षयहेतुः सन्तापः सज्जनेषु योऽकारि।**
**केषाममोघवचनं ये च पुनः सत्यमौनशमशीलाः ॥३६॥**

प्र : कश्च कुलक्षय हेतुः = What causes decline of a family?
उ : सन्तापः सज्जनेषु योऽकारि = Tormenting the mind of the noble.
प्र : केषाम् अमोघवचनम् = Whose words will not be false?
उ : ये च पुनः सत्यमौनशमशीलाः = The words of the truthful and the silent, and those who keep their minds under control, will never become untrue.

**इत्येषा कण्ठस्था प्रश्नोत्तरमालिका येषाम्।**
**ते मुक्ताभरणा इव विमलाश्चाभान्ति सत्समाजेषु ॥३७॥**

इति एषा प्रश्नोत्तरमालिका येषाम् कण्ठस्था, ते मुक्ताभरणा इव सत्समाजेषु विमलाः आभान्ति।

Those who wear this precious garland of questions and answers around their necks like a necklace of pearls, i.e. those who have imbibed the wisdom contained in this prashnottaramalika, shine in society of pure and right. (The society of nobles)

** प्रश्नोत्तरमालिका सम्पूर्णा **